# ॥ वाल्मीकि रामायण ॥

## २ अयोध्याकाण्ड

### अध्याय १०

आज्ञाप्य तु महाराजो राघवस्याभिषेचनम् ।
प्रियार्हां प्रियमाख्यातुं विवेशान्तःपुरं वशी ॥ १ ॥

तां तत्र पतितां भूमौ शयानामतथोचिताम् ।
प्रतप्त इव दुःखेन सोऽपश्यज्जगतीपतिः ॥ २ ॥

स वृद्धस्तरुणीं भार्यां प्राणेभ्योऽपि गरीयसीम् ।
अपापः पापसङ्कल्पां ददर्श धरणीतले ॥ ३ ॥

करेणुमिव दिग्धेन विद्धां मृगयुणा वने ।
महागज इवारण्ये स्नेहात्परिममर्श ताम् ॥ ४ ॥

परिमृश्य च पाणिभ्यामभिसन्त्रस्तचेतनः ।
कामी कमलपत्राक्षीमुवाच वनिताम् इदम् ॥ ५ ॥

न तेऽहमभिजानामि क्रोधमात्मनि संश्रितम् ।
देवि केनाभियुक्तासि केन वासि विमानिता ॥ ६ ॥

यदिदं मम दुःखाय शेषे कल्याणि पांसुषु ।
भूमौ शेषे किमर्थं त्वं मयि कल्याण चेतसि ।
भूतोपहतचित्तेव मम चित्तप्रमाथिनी ॥ ७ ॥

सन्ति मे कुशला वैद्या अभितुष्टाश्च सर्वशः ।
सुखितां त्वां करिष्यन्ति व्याधिमाचक्ष्व भामिनि ॥ ८ ॥

कस्य वा ते प्रियं कार्यं केन वा विप्रियं कृतम् ।
कः प्रियं लभतामद्य को वा सुमहदप्रियम् ॥ ९ ॥

अवध्यो वध्यतां को वा वध्यः को वा विमुच्यताम् ।
दरिद्रः को भवत्वाढ्यो द्रव्यवान्वाप्यकिञ्चनः ॥ १० ॥

अहं चैव मदीयाश्च सर्वे तव वशानुगाः ।
न ते कं चिदभिप्रायं व्याहन्तुमहमुत्सहे ॥ ११ ॥

आत्मनो जीवितेनापि ब्रूहि यन्मनसेच्छसि ।
यावदावर्तते चक्रं तावती मे वसुन्धरा ॥ १२ ॥

तथोक्ता सा समाश्वस्ता वक्तुकामा तदप्रियम् ।
परिपीडयितुं भूयो भर्तारमुपचक्रमे ॥ १३ ॥

नास्मि विप्रकृता देव केन चिन्न विमानिता ।
अभिप्रायस्तु मे कश्चित्तमिच्छामि त्वया कृतम् ॥ १४ ॥

प्रतिज्ञां प्रतिजानीष्व यदि त्वं कर्तुमिच्छसि ।
अथ तद्व्याहरिष्यामि यदभिप्रार्थितं मया ॥ १५ ॥

एवमुक्तस्तया राजा प्रियया स्त्रीवशं गतः ।
तामुवाच महातेजाः कैकेयीमीषदुत्स्मितः ॥ १६ ॥

अवलिप्ते न जानासि त्वत्तः प्रियतरो मम ।
मनुजो मनुजव्याघ्राद्रामादन्यो न विद्यते ॥ १७ ॥

भद्रे हृदयमप्येतदनुमृश्श्योद्धरस्व मे ।
एतत्समीक्ष्य कैकेयि ब्रूहि यत्साधु मन्यसे ॥ १८ ॥

बलमात्मनि पश्यन्ती न मां शङ्कितुमर्हसि ।
करिष्यामि तव प्रीतिं सुकृतेनापि ते शपे ॥ १९ ॥

तेन वाक्येन संहृष्टा तमभिप्रायमात्मनः ।
व्याजहार महाघोरमभ्यागतमिवान्तकम् ॥ २० ॥

यथाक्रमेण शपसि वरं मम ददासि च ।
तच्छृण्वन्तु त्रयस्त्रिंशद्देवाः सेन्द्रपुरोगमाः ॥ २१ ॥

चन्द्रादित्यौ नभश्चैव ग्रहा रात्र्यहनी दिशः ।
जगच्च पृथिवी चैव सगन्धर्वा सराक्षसा ॥ २२ ॥

निशाचराणि भूतानि गृहेषु गृहदेवताः ।
यानि चान्यानि भूतानि जानीयुर्भाषितं तव ॥ २३ ॥

सत्यसन्धो महातेजा धर्मज्ञः सुसमाहितः ।
वरं मम ददात्येष तन्मे शृण्वन्तु देवताः ॥ २४ ॥

इति देवी महेष्वासं परिगृह्याभिशस्य च ।
ततः परमुवाचेदं वरदं काममोहितम् ॥ २५ ॥

वरौ यौ मे त्वया देव तदा दत्तौ महीपते ।

तौ तावदहमद्यैव वक्ष्यामि शृणु मे वचः ॥ २६॥

अभिषेक समारम्भो राघवस्योपकल्पितः ।
अनेनैवाभिषेकेण भरतो मेऽभिषिच्यताम् ॥ २७॥

नव पञ्च च वर्षाणि दण्डकारण्यमाश्रितः ।
चीराजिनजटाधारी रामो भवतु तापसः ॥ २८॥

भरतो भजतामद्य यौवराज्यमकण्टकम् ।
अद्य चैव हि पश्येयं प्रयान्तं राघवं वने ॥ २९॥

ततः श्रुत्वा महाराज कैकेय्या दारुणं वचः ।
व्यथितो विलवश्चैव व्याघ्रीं दृष्ट्वा यथा मृगः ॥ ३०॥

असंवृतायामासीनो जगत्यां दीर्घमुच्छ्वसन् ।
अहो धिगिति सामर्षो वाचमुक्त्वा नराधिपः ।
मोहमापेदिवान्भूयः शोकोपहतचेतनः ॥ ३१॥

चिरेण तु नृपः संज्ञां प्रतिलभ्य सुदुःखितः ।
कैकेयीमब्रवीत्क्रुद्धः प्रदहन्निव चक्षुषा ॥ ३२॥

नृशंसे दुष्टचारित्रे कुलस्यास्य विनाशिनि ।
किं कृतं तव रामेण पापे पापं मयापि वा ॥ ३३॥

सदा ते जननी तुल्यां वृत्तिं वहति राघवः ।
तस्यैव त्वमनर्थाय किंनिमित्तमिहोद्यता ॥ ३४॥

त्वं मयात्मविनाशाय भवनं स्वं प्रवेशिता ।
अविज्ञानान्नृपसुता व्याली तीक्ष्णविषा यथा ॥ ३५॥

जीवलोको यदा सर्वो रामस्येह गुणस्तवम् ।
अपराधं कमुद्दिश्य त्यक्ष्यामीष्टमहं सुतम् ॥ ३६॥

कौसल्यां वा सुमित्रां वा त्यजेयमपि वा श्रियम् ।
जीवितं वात्मनो रामं न त्वेव पितृवत्सलम् ॥ ३७॥

परा भवति मे प्रीतिर्दृष्ट्वा तनयमग्रजम् ।
अपश्यतस्तु मे रामं नष्टा भवति चेतना ॥ ३८॥

तिष्ठेल्लोको विना सूर्यं सस्यं वा सलिलं विना ।
न तु रामं विना देहे तिष्ठेत्तु मम जीवितम् ॥ ३९॥

तदलं त्यज्यतामेष निश्चयः पापनिश्चये ।
अपि ते चरणौ मूर्ध्ना स्पृशाम्येष प्रसीद मे ॥ ४०॥

स भूमिपालो विलपन्ननाथवत्
स्त्रिया गृहीतो हृदयेऽतिमात्रता ।
पपात देव्याश्चरणौ प्रसारिताव्
उभावसंस्पृश्य यथातुरस्तथा ॥ ४१॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com